# Shri Raghavendra Padukapujavidhanam

# શ્રીરાઘવેન્દ્રપાદુકાપૂજાવિધાનમ્

## Document Information

Text title : Shri Raghavendra Padukapujavidhanam

File name : rAghavendrapAdukApUjAvidhAnam.itx

Category : deities_misc, gurudev, pUjA

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રપાદુકાપૂજાવિધાનમ્

શ્રીગુરોઃ પાદુકાપૂજાવિધાનં ગૃહધર્મિણામ્ ।
કૃષ્ણાવધૂતો વક્ષ્યેઽહં ગુરોરભિમતં યથા ॥ ૧॥

ધ્યાનમાવાહનં પશ્ચાદાસનં સ્નાનમક્ષતાઃ ।
ગન્ધપુષ્પાણિ નૈવેદ્યં ધૂપો દીપો નિરાજનમ્ ।
પુષ્પાઞ્જલિર્દ્વાદશૈવ પાદુકાપૂજને ક્રમે ॥ ૨॥

અથ પાદુકા પૂજાવિધિઃ ।
સાયઙ્કાલે ગૃહે સ્નાત્વા કૃત્વા સન્ધ્યાજપાદિકમ્ ।
હરિં વાયું ચ સમ્પૂજ્ય પાદુકે પૂજયેદ્ગુરોઃ ॥ ૩॥

અથ ધ્યાનમ્ ।
પાદુકે ગુરુરાજસ્યાઽપાદિકે સર્વસમ્પદામ્ ।
બાધિકે સર્વબાધાનાં સાધિકે ભવતાં મુદે ॥ ૪॥ - ઇતિ ધ્યાનમ્ ।

પાદૌ પાદુકયોરત્રાવાહયામિ મહાગુરોઃ ।
અત્ર સન્નિહિતૌ ભૂત્વા કામદૌ ભવતં મમ ॥ ૫॥ - ઇત્યાવાહનમ્ ।

ઇદમાસનમાસ્તીર્ણં તિષ્ઠતામત્ર પાદુકે ।
કુરુ ત્વં ગુરુરાજસ્ય કૃપા મે સ્યાદ્યથા તથા ॥ ૬॥ - ઇત્યાસનમ્ ।

શુદ્ધૈઃ સુગન્ધિભિઃ શીતૈઃ સલિલૈઃ સ્નપયામિ વામ્ ।
રાઘવેન્દ્રગુરોઃ પાદૌ તાપં મે હરતાં સદા ॥ ૭॥ - ઇતિ સ્નાનમ્ ।

ફલૈઃ ક્ષીરૈઃ શર્કરાદ્યૈઃ સ્નાનં ચેત્ પૂર્વમાચરેત્ ।
ગુરુરાજપદામ્ભોજન્યાસપ્રયત પાદુકે ॥ ૮॥

અક્ષતાન્ વાં પ્રદાસ્યામિ કુરુતં મામિહાક્ષતમ્ । - ઇતિ અક્ષતાન્ ।
ગુરુપાદરજોગન્ધલિપ્તાઙ્ગે પાદુકે યુવામ્ ॥ ૯॥

ગૃહીત્વા સુરભિં ગન્ધં વર્તેયથાં સુરદ્રુમૌ ॥ ૧૦॥ - ઇતિ ગન્ધમ્ ।

મલ્લિકાદિ સુપુષ્પાણાં માલા શ્રીગુરુપાદુકે ।
અસિતાનિ ચ પુષ્પાણિ ગૃહીત્વાઽવતમેવ મામ્ ॥ ૧૧॥ - ઇતિ પુષ્પમ્ ।

યથાશક્તિ યથાકાલં ભક્ત્યાઽઽનીતં ફલાદિકમ્ ।
સ્વીકૃત્ય સફલં માં ચ કુરુતં ગુરુપાદુકે ॥ ૧૨॥ - ઇતિ નૈવેદ્યમ્ ।

શ્રીરાઘવેન્દ્ર રાજેન્દ્રમુનીન્દ્રપદસઙ્ગતે ।
પાદુકે વાં પ્રદાસ્યામિ ધૂપં સર્વમનોહરમ્ ॥ ૧૩॥ - ઇતિ ધૂપમ્ ।

અન્ધકારહરં ચક્ષુઃસફલીકરણે પટુમ્ ।
દર્શનાર્થં ચ વાં દીપં દર્શયે ગુરુપાદુકે ।
શ્રીરાઘવેન્દ્રાય નમઃ દીપં દર્શયામિ ॥ ૧૪॥ - ઇતિ દીપમ્ ।

નીરાજનત્રયં કાર્યમધિકં વિભવો યથા ॥ ૧૫॥

જયતુ જયતુ પાદૂઃ પાતકધ્વંસકર્ત્રી
    જયતુ જયતુ બન્ધુર્બન્ધનિર્નાશયિત્રી ।
જયતુ જયતુ મિત્રં માતૃવદ્ રક્ષયિત્રી
    જયતુ જયતુ રાજદ્રાઘવેન્દ્રાઙ્ઘ્રિધાત્રી ॥ ૧૬॥

શ્રીમત્સદ્ગુરુપાદસઙ્ગવિભવે શ્રીપાદુકે પાદુકે
    પાટીરામલગન્ધબન્ધુરતનૂ શ્રીપાદુકે પાદુકે ।
નાનાલોકશિરોભિલાલિતમહા શ્રીપાદુકે પાદુકે
    દેહિ ત્વં મમ મઙ્ગલં તવ ભજે શ્રીપાદુકે પાદુકે ॥ ૧૭॥

ગુરુવરપદપદ્મપૂતદેહે મમ મુખમસ્ત્વિવતિ પાદુકે શ્રયે ત્વામ્ ।
મયિ સદયમનાસ્ત્વદેકભક્તે મૃદુલતનૂદરિ સુન્દરિ પ્રસીદ ॥ ૧૮॥ - ઇતિ નીરાજનમ્ ।

વન્દે ત્વાં દેવિ દેવવ્રતિયતિપતિપદ્ધૂલિકાલિપ્રલિપ્તે
    ભૂયો ભૂયો દયા મે ભવતુ વૃતવરે માનયાનસ્ય દિવ્યે ।
માનં જ્ઞાનં ધનં મે દિશ દિશ દશધા પાદુકે દુષ્ટદુઃખાત્
    પાહીતો હીનહીનાત્ સખસખિ સુખિનં માં તનૂત પ્રતપ્તમ્ ॥ ૧૯॥

કામદાત્રી સકામાનામન્યૈકામૃતદાયિકા ।
કાલે કાલેઽઘકાર્માસં દહ્યાત્ કાપ્યાર્યપાદુકા ॥ ૨૦॥

સતરલાં નલિનેન તવાઙ્ગકે પ્રણિદધામિ ગુરૂત્તમ પાદુકે ॥ ૨૧॥

શ્રીરાઘવેન્દ્ર ગુરુરાજપદારવિન્દ

    સંસર્ગલબ્ધસુગુણૈઃ જગતિ પ્રપૂજ્ય ।
શ્રીપાદુકે સુમુખિ સુન્દરિ સૂક્ષ્મમધ્યે
    પુષ્પાઞ્જલિં વૃણુ વિધેહિ સુમઙ્ગલં મે ॥ ૨૨॥

પ્રદક્ષિણનમસ્કારૌ કરિષ્યે પાદુકે તવ ।
મામુદ્ધર કૃપાપૂર્ણે ભવદુઃખામ્બુધેર્દ્રુતમ્ ॥ ૨૩॥

અનેકધા યથાયોગ્યમુપચારાન્ સમર્પયેત્ ।
કૃત્વાઽઽભીષ્ટપ્રાર્થનાં ચ સર્વતન્ત્રે સમર્પયેત્ ॥ ૨૪॥

શ્રીગુરોશ્ચરણપઙ્કજસઙ્ગાન્મોદમાનહૃદયે મૃદુલાઙ્ગિ ।
ઇષ્ટપૂર્તિરધુના મમ ભૂયાઃ શિષ્ટશીર્ષપરિપાલિતમૂર્તે ॥ ૨૫॥

પાહિ માં સુમુખ વત્સલભાવાદ્વાહિકા ત્વમસિ ભક્તભરસ્ય ।
યા હિ મે વિપદ ઉચ્છ્રિતસર્પાઃ તા હિનસ્તિ નમનં તવ પાદૂ ॥ ૨૬॥

પાયાઃ માં શ્રીગુરુરાઘવેન્દ્રચરણાપાયાપહારોદ્યતે
    માયાપાશવિનાશિનિ પ્રભજતાં હેયાખિલારોજ્ઝિતે ।
દાયાદેઽમરપાદપસ્ય ચ પરીધૂયાખિલં પાતકં
    જાયાપુત્રગૃહાદિ સંસૃતિષુ મે ભૂયાઃ મુદે પાદુકે ॥ ૨૭॥

ઇતિ શ્રીમત્કૃષ્ણાવધૂતપણ્ડિતકૃતૌ શ્રીરાઘવેન્દ્રતન્ત્રે
    ત્રયોદશપટલે પાદુકાપૂજાવિધાનં સમ્પૂર્ણમ્ ।

Proofread by Gopalakrishnan, PSA Easwaran

---

*Shri Raghavendra Padukapujavidhanam*
pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*